श्रीमद्देवीभागवतमहापुराणे शक्तितत्त्वविमर्शः

विद्यावारिधिः शोधप्रस्तावः

विद्यावारिधिः इत्युपाधिप्राप्तये प्रस्तुतः संस्कृतेन - पिएच्.डि

अद्वैतवेदान्तविषयसम्बन्धः

SYNOPSIS FOR

DOCTOR OF PHILOSOPHY

SANSKRIT (संस्कृत)

शोधकर्ता व अनुसंधाता

श्री अर्णदाशंकरआचार्यः

क्रमांक संख्या - 190700417

मार्गदर्शक

डाँ रेणु सिंह .

YBN UNIVERSITY

POWER GRID ROAD , RAJAULATU , NAMKUM , RANCHI ,

JHARKHAND

PIN - ८३४०१०

सत्रम् -२०२३

प्रस्तावना -

शोधविषयः – " श्रीमद्देवीभागवतमहापुराणे शक्तितत्वविमर्शः " शक्तिशब्दस्य प्रयोगः विभिन्नार्थेषु क्रियते। सुक्ष्मपदार्थादारभ्य ब्रह्माण्डपर्यन्तं शक्त्या सञ्चाल्यते। अतिसुक्ष्मपरमाणावापि परमशक्तिः वर्तते। जगति कोऽपि जनः तादृशो न दृश्यते यः शक्ति विषये किमपि न जानीयात् ? पुण्यवन्तः पापिनश्चापि शक्तिविमर्शं कुर्वन्ति। केचन शक्तिमन्तः केचन शक्तिहीनाश्च दृश्यन्ते। केचन सामान्यशक्तिमन्तश्च भवन्ति। यदा शक्तिनिर्गच्छति शरीरात् तदा परलोकगमनमेव शरणं भवति। प्रत्येगास्मिन् सञ्चारे शक्त्याः आवश्यकता भवति। सञ्चारं विना अस्माकं जीवनयात्रापि नाग्रे गन्तुं शक्नोति। भौतिकवैज्ञानिका अपि शक्तिं स्विकुर्वन्ति। अस्मिन विषये आस्तिकाः भवन्तु नास्तिकाः वा शक्तिं विहाय नान्या गतिः सर्वेषाम्। विभिन्नरूपेण शक्त्याः वर्णनं विद्यते । न केवलं भारतदेशेऽपितु विदेशेष्वपि शक्तेः विभिन्न क्षेत्रेषु सम्पाद्यन्ते यथा – परमाणुशक्तिमादाय विभिन्नदेशियवैज्ञानिकाः शोधकार्येषु निमग्नाः सन्ति। परन्तु भौतिकशक्त्या सह आध्यात्मिकशक्त्याश्चावश्यकतानुभूयते । शक्त्याः सदुपयोगः करणीयः न तु दुरुपयोगः । यदा जनानां वधाय शक्त्याः प्रयोगः क्रियते तदा अस्याः शक्त्याः दुरुपयोग एव । अतः विवेकशक्तिरावश्यकी । विवेकशक्त्या जनाः उचितानुचितकार्याणां विवेचनं कृत्वा स्वमार्गं निर्धारयन्ति । विवेकिनो जना एव सद्गुणवैभवसम्पन्नाः भवन्ति । विवेकशक्त्या भौतिकसुखानि आध्यात्मिकसुखानि च प्राप्नुवन्ति ।

वस्तुतः जीवनस्य प्रत्येकास्मिन् क्षेत्रे शक्त्याः आवश्यकताऽनुभूयते । एकस्याः शक्त्याः निवारणमपरस्याः शक्त्याः माध्यमेन क्रियते । शक्तिस्वरूपविमर्शक्रमे वैयक्तिकशक्तिः , सामाजिक शक्तिः , राष्ट्रियशक्तिः , अन्तराष्ट्रियशक्तिश्चेति स्पष्टतया अनुभूयते । एताः शक्तीः अतिरिच्य आध्यात्मिकशक्तिः चिच्छक्तिः पराशक्तिः , प्राकृतिकयसक्तिः , मनशशक्तिः , आत्मशक्तिः , दैवीयशक्तिः . राक्षसीशक्तिश्चेति शक्त्याः नाना स्वरूपाणि दृश्यन्ते । सर्वाः शक्तयः सम्मिल्य एकत्रीभूय महाशक्तिश्वरुपेण निर्गद्यते भारतीयविचक्षणैः ।

भारतीयपरम्परायां महाशक्तिः , महामाया , प्रकृतिः , आद्याशक्तिः , पराम्बा , जगदम्बा , भवतारिणी , दुर्गा , काली , लक्ष्मीः , सरस्वतीप्रभृतयः शक्तयः उपास्यदेवीरूपेण विद्यमानाः सन्ति । भारतीयज्ञानपरम्परा वैदिककालादारभ्येदानीं यावदविच्छिन्ना वर्तते । मायां प्रतिमायां स्तो यो देशः असौ भारतदेशोऽस्ति। भगवत्याः भारत्याः नैके वरदपुत्राः भारतभुवि सम्प्रत्यपि विराजमानाः सन्ति । वैदिककालेऽपि अस्माकं चिन्तनशीलाः ऋषयः शास्त्रचिन्तनमाध्यात्मिकदृष्ट्या सम्पाद्य सुलभरीत्या सामाजिकेभ्य उपस्थापयामासुः । वेदेषु विभिन्नशक्तिनां वर्णनं कृत प्राज्ञैः। तत्रापि मूलरुपेण परब्रह्मपरमात्मा सर्वशक्तिमान् इति सारांशतया निगदितम् ।

वैदिककालादारभ्य शनैः शनैः भारतीयज्ञानपरम्परा विभिन्नपथगामिनी सञ्जाता । तस्य एकं प्रवलकारणं परिलभ्यत् मानवीयज्ञाने ह्रासता । वेदानां मन्त्राः निगुढार्थसमन्विताः सन्ति । अतः सामान्यज्ञानवद्भ्यः नेमे वेदाः रुचिकराः विद्यन्ते । कालान्तरे पौराणिकग्रन्थानां निर्माणं जातम् । यद्यपि वैदिक सिद्धान्ता एव पुराणेषु वर्णिताः सन्ति ; तथापि विषयवैशद्यात्

विषयवैभिन्न्यं दृश्यते । अस्मभ्यं ' वेदाः प्रमाणम् ' वेदाविरोधी पौराणिकतर्कोऽपि प्रमाणमेव । अतः पुराणान्यापि प्रमाणानि सन्ति । इमानि पुराणानि भारतीयसंस्कृतेः पुरातनस्वरुपपरिप्रकाशने सम्र्र्थानि सन्ति । कथामाध्यमेन आख्यायिकामाध्यमेन च वेदार्थान् प्रकटयन्ति । प्राचीनेतिहासस्य परिप्रकाशनं कुर्वन्ति । अज्ञात कथाः अपिकाश्चन पुराणेषु निगद्यन्ते । पारमार्थिकज्ञानप्रदानाय , भारतीयसांस्कृतिकज्ञानप्रदानाय , प्राचीनाचारविचारसञ्चाराहारविहारव्यवहारपरिज्ञानाय , प्राचीनभौगलिकज्ञानप्रदानाय , विविधशाश्त्राणां सारसर्वस्वज्ञानाय च पुराणानि सदा सर्वदा सर्वथा च नमनीयानि , स्मरणीयानि , वाचनीयानि च सन्ति । सर्वै जनाः पुराणानामध्ययनं कर्तुं शक्नुवन्ति नास्त्यत्राधिकारिभेदः यथा वेदानां महत्वं तथैव पुराणानामापि भारतीयसमाजेन्वेति निश्चप्रचम् ।

श्रीमदेवीभागवतमहापुराणस्य वैशिष्ट्यम् -

स्वभावतया पिता कठोरो भवति संघर्षशीलत्वात् । यद्यपि पितुः स्थानमपि पूर्णतया सम्मानयोग्यं दृश्यते तथापि मातुः समक्षं सर्वे सिद्धान्ताः मौनमेवालम्ब्यन्ते । सम्प्रति

कलियुगस्य प्रभावेण काश्चन मातरोऽपि मातृपदवाच्याः न सन्ति। तासां कृत्यानि न समीचीनानि भवन्ति । तथापि अशेषाः मातरः अन्यान् शिशूनापि पालयन्ति । मातुः कृपया निर्वलपुत्रा अपि सुखेन शयनं कुर्वन्ति । न केवलं मानवयोनौ अपितु पशुत्वेपि मातृणां कृपा पुत्रेषु पुत्रीषु स्वसन्ततिषु वा अधिक्येन दृश्यन्ते सहनशीलतायाः , करुणायाश्च प्रतिमूर्तिः भवति माता सहजभावेन ' माँ ' इत्येव शब्दः शैशवास्थायां निस्सररति मुखात् । सहजभावेन सरलभावेन च मातुः सेवां कर्तंशक्यते केनापि । प्रायः इदमेव कारणं मातृभावेन परमात्मशक्तेराराधनस्य । आर्तस्वरेण यदा स्तुतिः क्रियते जनैः तदा स एव परमात्मा स्वकठोरत्वं परित्यज्य मातृभावं स्विकरोति । अखिलब्रह्माण्डस्थशक्तिरेकैव विद्यते । आश्रयभात् तासु शक्तिषु भेदस्यानुभुतिर्जायते । यथोपासकाः तथैव देव्याः स्वरुपमपि परिवर्तते । शक्ति –

शक्तिमतोश्चाभेदो भवति । अतः परमात्मनि परमाशक्तो चाभेदोऽस्ति । तत्र भेदबुद्धिर्न कर्तव्या ।

पुराणवाङ्मयेषु श्रीमदेवीभागवतमहापुणस्य स्थानं महत्वपुर्णं विद्यते । शाक्तसाधकाः पुराणमिदं वेदतुल्यं स्वीकुर्वन्ति । शाक्तभागवतनाम्नापि जेगीयते प्राज्ञैः । ग्रन्थेस्मिन् सर्वत्र भागवत्याः आद्याशक्त्याः महिमायाः वर्णनं विद्यते । मुख्यरुपेण परंब्रह्मपरमात्मनः मातृरुपस्य

तदुपासनायाश्च वर्णनं प्राप्यते । भगवत्याः जगदम्बायाः आद्याशक्त्याः अनन्तलीलाः सन्ति।

तासु लीलासु काश्चनमात्र प्रतिपादिताः सन्ति । एतासां लानामास्वादनं कोऽपि भक्तिपूर्णसाधक एव कर्तुं शक्नोति । जगदम्बायाः चरणचञ्चरीकभक्तः लीलाः पठित्वा श्रुत्वा च आनन्देनिमग्ना भवन्ति ।

संसारे मातृभावस्य महिमा सर्वैरङ्गीक्रियते । सर्वाधिकी श्रद्धा प्रायः मातरं प्रत्येव भवति । मातुरङ्के उषित्वा संसारस्य प्रथमदर्शनं करोति शिशुः । मातेव अस्माकं प्रथमगुरुः भवति । भौतिकज्ञानस्य आध्यात्मिकज्ञानस्य च मूलाधारस्वरूपा मातैव भवति । तैत्तिरीयोपनिषदापि निगद्यते प्रथमतया - ‘ मातृदेवो भव ’ इति । या जगदम्बा महाशक्तिस्वरुपिणी देवी समष्टिस्वरुपिणी भगवती परमोपास्या वर्तते सैव चराचरजीवानां कल्याणमार्गप्रदर्शिकापि विद्यते । एषैव महाशक्तिः नानारुपेण विलसति सम्पूर्णजगदिदं देव्याः पराम्बायाः विलासमात्रं विद्यते । शक्त्यैव विरञ्चिः प्रपञ्चं सृजति , विष्णुः जीवान् पालयति , शिवश्च संहारे समर्थो भवति । अतः सृजनकर्त्री , पालयत्री , संहारकत्री चेयं महाशक्तिरेव विद्यते ।

शक्तिं विना शिवोऽपि शव भवति । एषैव महामाया नवदुर्गारूपेण दशमहाविद्यारूपेण च परिकीर्तिता । एषैव अन्नपूर्णा , पार्वती , सरस्वती , जगद्धात्री , कात्यायनी , ललिता , गायत्री , भुवनेशेवरी , काली , तारा , बगलामुखी , षोडशी , त्रिपुरासुन्दरी , धुमावती , मातंगी , कमला , पद्मावती , दुर्गाप्रभृतयः सन्ति । एषा एव सर्वाधारा वर्तते । नरस्वरुपा , नारीस्वरुपा चापि विद्यते । सुक्ष्मातिसुक्ष्मकादारभ्य ब्रह्मपर्यन्तं यत्र यत्र शक्तिरनुभुयते व्यापारस्च दृश्यते तत्र तत्र परमलीलाव्यारावच्छिन्नदेव्याः सामर्थ्यं विलसति । परमात्मस्वरुपिणी महाशक्तिः सर्वत्र विभिन्नरुपेण विराजमानस्ति । श्रीदेव्यथर्वशिर्षे निगद्यते -

“ साब्रवीत् - अहं ब्रह्मस्वरुपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यं च ॥ 2 ॥

अहमानन्दानान्दौ । अहं विज्ञानाविज्ञाने । अहं ब्रह्माब्रह्मणी वेदितव्ये। अहं पञ्चभूतान्यपञ्चभूतानि ।अहमखिलं जगत् ॥ 3 ॥

वेदोऽहमवेदोऽहम् । विद्याहमविद्याहम् । अजाहमनजाहम् । अधश्चोर्ध्वं च तिर्यक्चाहम् ॥ 4 ॥

अहं सोमं त्वष्टारं पुषणं भगं दधामि । अहं विष्णुमुरुक्रमं ब्रह्माणामुत प्रजापतिं दधामि ॥ 6 ॥

एषाऽऽत्मशक्तिः । एषा विश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा । एषाश्रीमहाविद्या । य एवं वेद स शोकं तरति ॥ 15 ॥ ” आत्मशक्तिविहिनो मानवः जगति कपत्रापि मान्यो न भवितुमर्हति ।

तथा च महाज्ञानिनोऽपि मातुः अकृपया मोहं पतन्ति । अतएव एषा महामाया वर्तते । अस्याः समग्रोपासनयाः आधारग्रन्थः श्रीमद्देवीभागवतमहापुराणं वर्तते ।निष्कर्षतया यदि देवीभागवतं

पश्यामस्तदा आसक्तेरभावः वैराग्ये च प्रवृत्तिरिति दृश्यतेऽत्र । मोह एव दुःखस्य कारणं भवतिति प्रायः सर्वैः स्वीक्रियते । अतः तस्य मोहस्य त्याग आवश्यकोऽस्ति । किन्तु भगवत्याः कृपांविना आसक्तेः मोहस्य वा परित्यागः कथमपि न सम्भवति । मुक्तये सांसारिकबन्धनमोचनाय च मातुरेव शरणं दृश्यते । जगदम्बायाः प्रभावेण मानवाः सांसारिकसुखानि प्राप्य मुक्तिमपि लभ्यन्ते । उच्यते च -

" श्वपाको जल्पाको भवति मधुपाकोपमगिरा निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ।

तवापर्णे कर्णे विशति मनुवर्णे फलमिदं जनः को जानीते जननि जपनीयं जपविधौ ॥(दे . क्ष 6)

आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि ।

नैतच्छठत्वं मम भावयेयाः क्षुधातृषार्ता जननीं स्मरन्ति ॥ (दे . क्ष . 10)

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।

अपराधपरम्परापरं न हि माता समुपेक्षते सुतम् ॥ (दे . क्ष . 11) "

एतादृशभावनं दर्शनमन्यत्र दुर्लभम् । ज्ञानं ध्यानं विज्ञानमज्ञानं सर्वं मातुः श्रीचरणयोः समर्प्य भक्त्याः निश्चिन्तोभूय स्मरणपुर्वकं जीवनयात्रां समाप्य देवलोकं प्राप्नुवन्ति । श्रद्धया निष्ठया , निश्चलभावेन , निश्छलभावेन च जगदम्बायाः कृपी प्राप्यते । न केवलं शुष्कतर्केण वादविवादेन च कृपानुभूतिर्जायते । बहवो ज्ञानिनः अहंकारिणः सन्तः प्रपञ्चे पक्वाः सञ्जाताः । अतः बालबुद्ध्या परम्बायाः कृपा प्राप्यते न तु पाण्डित्येन । ज्ञानार्जनाय पाण्डित्यस्य प्रयोजनं भवति न तु साधनायै । बहवः तादृशाः देवीभक्ताः सन्ति भारते ये निराक्षराः सन्ति किन्तु शक्त्याः अभावो नास्ति तस्य एकमेव कारणं निराडम्बरभक्तिपूर्णमातृप्रेम एव । शब्दानां रटनमात्रेण व्यापरस्तु अवश्यं प्रचलति किन्तु आन्तरिकी श्रद्धा कथमपि न जागर्ति । सा स्वयं महानटीं वर्तते तां कोवा नीटकं दर्शयेत् ?

श्रीमद्देवीभागवतस्य विषयाः द्वादशस्कन्धेषु विभक्ताः सन्ति । तत्र प्रथमस्कन्धात् पूर्वं देवीभागवतस्य महात्म्यवर्णनं दृश्यते । श्रीमद्देवीभागवतस्य माहात्म्ये इत्थं दृश्यते -

" देवीभागवतं नाम पुराणं परमोत्तमम् ।

त्रैलोक्यजननी साक्षाद् गीयते यत्र शाश्वती ॥

श्रीमद्भागवतं यस्तु पठद्वा शृणुयादपि ।

श्लोकार्धं श्लोकपादंवा स याति परमांगतिम् ॥

पुजितं यद्गृहे नित्यं श्रीभागवतपुस्तकम् ।

तद्गृहं तीर्थभूतं हि वसतां पापनाशकम् ॥

यस्तु भागवतं देव्याः पठेद् भक्त्या शृणोति वा ।

धर्ममर्थं च कामं च मोक्षं च लभते नरः ॥

सुधां पिबन्नेक एव नरः स्यादजरामरः ।

देव्याः कथामृतं कुर्यात् कुलमेवाजरामरम् ॥

अष्टादशपुराणानां मध्ये सर्वोत्तमं परम् ।

देवीभागवतं नाम धर्मकामार्थमोक्षदम् ॥

इदमाखिलकथानां सारभुतं पुराणं निखिलनिगमतुल्यं सप्रमाणानुविद्धम् ।

पठति परमभावाद्यः शृणोतीह भक्त्या स भवति धनवान्वै ज्ञानवान्मानवोऽत्र ॥ ” इति पृ 13

सांसारिकशक्तिविषये कदाचित् तर्कमाध्यमेन प्रवेशो भवितुमर्हति किन्तु आध्यात्मिकशक्तीनामनुभूति तपो विना न कथमपि ? अत एव ग्रन्थकारिणाभाणि - परमभावात् यः शृणोति पठति च इति । यः परमभावात् देवी भागवतं पठति , भक्त्या च शृणोति स धनवान ज्ञानवान च भवति । वयं समाचारपत्रस्य पठनं कुर्मः किन्तु तत्र श्रद्धा न भवति। समाचार ज्ञानाय केवलं तत्पत्रस्य क्रियते । तद्वदस्य ग्रन्थस्य पाठनं पठनञ्च नोचितं प्रतिभाति । शनैः शनैः अभ्यासेन मातुः कृपया शक्तेरप्यनुभूतिजायते साधकैः ।

प्रस्तावित शोधविषयस्यौचित्यम् -

सप्रति समाजेषु नाना विवादाः दृश्यन्ते । तेषु विवादेषु एको धार्मिकविवदोऽपि वर्तते । यद्यपि विवादस्य कारणं सर्वत्रज्ञान्तैव विद्यते तथापि समन्वयवादेन मन्ये सर्वेषां विवादानां निराकरणं कर्तुं शक्यते । केचन वैष्णवाः सन्ति , केचन शैवाः , केचन गणपताः , केचन शाक्ताः सन्ति । भक्तिमार्गे एकमेव देवं सर्वं मत्वा उपासना क्रियते ; किन्तु अन्येषामिष्टानां विरोधस्य स्थानं न कुत्रापि विद्यते । शक्तितत्वस्वीकारे बाह्यस्वरुपस्य स्वतो निरापरणं भवति एकैव शक्तिः सर्वत्र व्याप्तिरस्ति अतः सर्वत्र समानभावेन कार्यं प्रचलयति । तथा च ये अन्यधर्मावलम्बिनः सन्ति तेऽपि शक्तिं निराकर्तुं समर्थाः न सन्ति । नास्तिकाः अपि शक्तिं

स्वीकुर्वन्ति । अतः सर्वेषां समाधानं सर्वेषां शरणञ्च शक्तिरेव दृश्यते । एतत्सर्वं तथ्यं विचिन्त्य प्रस्तावितशोधविषयरुपेण - ' श्रीमद्देवीभागवतमहापुराणे शक्तितत्त्वविमर्शः ' इति स्वीकृतः । अस्य महापुराणस्य विषयाः अपि सरलतया प्रतिपादिताः सन्ति । सामान्यजनाः अपि आनन्देन ज्ञातुं शक्नुवन्ति । महापुराणेऽस्मिन् पुराणस्य पञ्चलक्षणमपि संगच्छते । केचन इमे मुखविषयाः सन्ति -

क - विभिन्नकथाः उपाख्यानानि च ।

ख – आद्याशक्तिस्वरुपवर्णनं तत्प्रभावर्णनञ्च ।

ग - आधारशक्तिवर्णनम् ।

घ - भगवत्याः विभिन्नस्तुतयः ।

ङ - नवरात्रविधानम् ।

च - मायायाः प्राबल्यानिरुपणम् ।

छ - परमात्मनः स्थुलसुक्ष्मस्वरुपणम् ।

ज - विभिन्नदेवीनां प्रकट्यम् ।

झ - पवित्रतीर्थवर्णनम् ।

ञ - हरिश्चन्द्रोपाख्यानस्य विशदतयोपस्थापनम् ।

ट - शक्तिपीठानामाविर्भावः ।

ठ - योगाङ्गानां वर्णनम् ।

ड – देवीपुजनस्य विविधप्रकाराणां वर्णनम् ।

ढ – विभिन्नव्रतोपासनानां वर्णनम् ।

ण - प्रकृतितत्वनिरुपणम् ।

य - सरस्वतीदेव्याः उपासनायाः वर्णनम् ।

त - लक्ष्मीदेव्याः उपासनायाः वर्णनम् ।

थ - तुलसीदेव्याः उपासनायाः वर्णनम् ।

द - सावित्रीदेव्याः उपासनायाः वर्णनम् ।

ध - भगवतीषष्ठीदेव्याः उपासनायाः वर्णनम् ।

न - मंगलाचण्डीदेव्याः उपासनायाः वर्णनम् ।

प - भगवतीमनसादेव्याः उपासनायाः वर्णनम् ।

फ – सदाचारविवेचनम् ।

व – विभिन्नद्वीपानां वर्णनम् ।

भ – सूर्यचन्द्रदिग्ग्रहाणां गतिवर्णनम् ।

म – राहुमण्डल वर्णनम् ।

य – विभिन्ननरकाणां वर्णनम् ।

र – कलियुगस्य वर्णनम् ।

ल – गंगायाः उत्पत्तिप्रसंगवर्णनम् ।

ब – सावित्रीयमराजसंवाद ।

स – स्वाहोपाख्यानम् ।

श - स्वधोपाख्यानम् ।

ष - दक्षिणोपाख्यानम् ।

ह - विभिन्नमनुनांवर्णनम् ।

क्ष – महिषासुरवधस्य विशदवर्णनम् ।

य – गायत्रीशक्तिर्णनम् ।

ल - ब्रह्मशक्तिर्णनम् ।

ळ - उपासनाशक्तिर्णनम् ।

क्क - योगशक्तिर्णनम् ।

ख्ख - मन्त्रशक्तिर्णनम् ।

ग्ग - मोहिनीशक्तिर्णनम् ।

घ्घ – रुद्राक्ष महिमावर्णनम् ।

च्च - भस्मधारणञ्चेति ।

सर्वेक्षणम् -

विषयचयनं , विषयनिर्धारणं , विषयनिर्वाचनं शोधसमस्या वा समानमेवार्थमवधारयति । शोधकर्तुः मुख्यसमस्या भवति शोधसमस्यायाः चयनम् । यतो हि समस्यायाः अभावे समाधानस्यावश्यकतैव न स्यात् । अतः शोधकर्ता सावधानतया शोधसमस्यायाः चयनं करोति । अत्र सर्वेक्षणस्य महत्यावश्यकता प्रतिभाति । यां शोधसमस्यां शोधकर्ता गृहणाति तस्यां कार्यं जातं नवेति सर्वेक्षणं विना ज्ञातुं न शक्यते । तथा च सर्वेक्षणेन समस्यायाः स्पष्टीकरणं भवति । एवम्प्रकारेण शोधार्थी अन्तर्जालमाध्यमेन , शोधप्रबन्धगारं गत्वा , विषयविशेषज्ञैः सह मिलित्वा समृद्ध साहित्यानां सर्वेक्षणं कृत्वा वा शोधसमस्यां निर्धारयति । अनेन सर्वेक्षणनैते लाभाः भवितुमर्हन्ति -

क - पिष्टपेषणस्यावरोधनम्

ख – समुचितविषयनिर्धारणम्

ग - अनुचितकालनिक्षय़ेपनिरोधन्

घ - विषयस्य दृढीकरणम्

ङ – प्रशस्तशोधप्रबन्धनिरुपणम्

च - आर्थिकक्षत्यवरोधनम्

छ – सामाजिकप्रतिषाप्राप्तिञ्च

ज – विद्वत्समाजेषु समादरः

झ – विषयस्य तत्त्वनिरीक्षणज्ञानम्

ञ – शोधप्रबन्धीयवैज्ञानिकदृष्टिप्राप्तिः

ट – शोधप्रबन्धीयगुणवत्तानिर्धारणम्

ठ – प्रकृतसमस्यासमाधानाय ज्ञानप्राप्तिः

ड - समस्यासमाधानेन सामाजिकलाभनिरुपणम्

ढ – शोधप्रबन्धानिरस्तीकरणम्

ण – सन्दर्भितविषये ज्ञानवैशद्यम्

त – शोधप्रबन्धप्रस्तुतो अवाञ्छितपदार्थनिरसारणम्

थ - अन्यशोधसमस्यायाः अपि निर्धारणम्

द – उचितानुचितनिर्णयज्ञानार्जनम्

न - क्रमबद्धरूत्या शोधप्रबन्धलेखसामर्थ्यसम्पादनम् इति ।

शोधस्य प्रकृति -

कस्मैचिदपि शोधाय काचिद्विशिष्टा पद्धतिरंगीक्रियते मुख्यतया । स्वीकृतपद्धत्या शोधकार्यं सौलभेन सहजभावेन च पूर्णतां याति । एताः शोधपद्धायः काश्चनेमाः सन्ति -

१- परम्परागत पद्धतिः

२ – सर्वेक्षण पद्धतिः

३ – शाश्त्रीयाध्यय पद्धतिः

४ – तुलनात्मिका पद्धतिः

५ – समस्यामूलक पद्धतिः

६ – क्षत्रीयाध्ययन पद्धतिः

७ – वर्गीयाध्ययनपद्धतिः

८ – विनियुक्ता पद्धतिः

९ – मूल्यनिर्धारणात्मिका पद्धतिः

१०- अवस्थाध्ययन पद्धतिः

११- सुत्रबद्धप्रकाश्या पद्धतिः

१२ – परिकल्पनात्मिका पद्धतिः

१३ – समालोचनात्मिका पद्धतिः

१४ – सम्पादनात्मिका पद्धतिः

१५ – तथ्यानुसन्धानात्मिका पद्धतिः

१६ – वस्तुमित्तिका पद्धतिः

१७ – पर्यवेक्षणात्मिका पद्धतिः

१८ – समीक्षात्मिकपद्धतिः

१९ – प्रयोगिक पद्धतिः

२० – समुहावलम्बनात्मिका पद्धतिः

२१ – व्यक्तिवृत्राध्ययन पद्धतिः

एताः अतिरिच्य अन्याः अपि नैकाः पद्धतयः सन्ति । प्रकृतशोधकार्ये मुख्यतया समीक्षात्मक पद्धतिः स्वीकारिष्यते ।सहैव तथ्यानुसन्धानात्मिका पद्धतिरपि अपरिहार्यस्ति । तथ्यानामध्ययनं विश्लेषणं विना तेषां समीक्षापि न कर्तुं शक्यते । सम्यक् रुपेण इक्षणं तथ्यानां दर्शनं समीक्षणं भवति तदाधारेण पुनः प्रकृतशोधसमास्यायाः दृष्ट्या समाधानान्वेषणं क्रियते ।

शोधस्य प्रारूपम्

अध्यायविभाजनम्

श्रीमद्देवीभागवमहापुराणे शक्तितत्वविमर्शः

भूमिका -

प्रथमोध्यायः –

१ . पुराणानामाविर्भावः तेषां परिचयश्च

२ . पुराणानां प्राचीन्यम्

३. पुराणानां महत्वम्

४ . पुराणकालविमर्शः

द्वितीयोऽध्यायः –

१ . पुराणेषु देवीभागवतमहापुराणस्य वैशिष्ट्यम्

२ . देवीभागवतमहापुराणस्य भाषा एवं लेखनशैली

३. देवीभागवतमहापुराणस्य पुराणत्वविमर्शः

तृतीयोऽध्यायः –

१ . देवीभागवतमहापुराणस्य प्रतिपाद्यविषयाः

२ . देवीभागवतमहापुराणे कथाविमर्शः

३ . देवीभागवतमहापुराणे उपाख्यानविमर्शः

४ . देवीभागवतमहापुराणे स्तुतिविमर्शः

चतुर्थोऽध्यायः -

१ . आध्याशक्तिविमर्शः

२ . गायत्रीशक्तिविमर्शः

३ . ब्रह्मशक्तिविमर्शः

४ . योगशक्तिविमर्शः

५ . मन्त्रशक्तिविमर्शः

पञ्चमोऽध्यायः -

१ . व्रतोपासनाशक्तिविमर्शः

२ . दुर्गादेव्याः आराधनाशक्तिविमर्शः

३ . सरस्वतीदेव्याः उपासनाशक्तिविमर्शः

४ . लक्ष्मीदेव्याः उपासनाशक्तिविमर्शः

५ . कालीदेव्याः उपासनाशक्तिविमर्शः

६ , देवीभागवतस्थान्यदेवीनामुपासनाशक्तिविमर्शश्च

षष्ठोऽध्यायः –

१ . रुद्राक्षमाहात्म्यवर्णनम्

२ . भस्मधारणमहात्म्यम्

३ . सदाचारवर्णनम्

४ . पवित्रतीर्थानां वर्णनम्

५ . शक्तिपीठानां वर्णनम्

६ . वर्तमानकाले देवीभागवतमहापुराणस्य सामाजिकोपयोगिता

- उपसंहारः
- सन्दर्भग्रन्थसूची

क्र . सं .	ग्रन्थ नाम	ग्रन्थकाराः	प्रकाशनम्	प्र.वर्षम्/ सं.
१	अभिज्ञान शाकुन्तलम्	डा. श्रीकृष्णमणि त्रिपाठी	चौ . सु . प्र , वाराणासी	1993/2
२	अमरकोषः	वासुदेवशर्मा	चौ . कृ . अ . „	2002/1
३	अष्टाध्यायी	डा . नरेश झा	चौ . सु . प्र . ..	2006/1
४	ईशादि नौ उपानिषद्		गीताप्रेस , गोरखपुर	संवत् 2053/16
५	उपनिषदङ्काः		„ „	2060/10
६	ऋगवेद संहिता		चौ . प्र . दिल्ली	2011 (पु . मु .)
७	ऐतरेयोपनिषद्		गीताप्रेस , गोरखपुर	2060/09
८	कठोपनिषद्		„ „	2060/09
९	छान्दोग्योपनिषद्		„ „	2069/ 17
१०	तन्त्रालोकः	म . म . पं . मुकुन्दराम शाश्त्री	इण्डियन प्रेस , इलाहाबाद	1918 / 02
११	देवी भागवतमहापुराण		गीताप्रेस , गोरखपुर	सं . 2071
१२	देवीस्तोत्ररत्नाकर		„ „	2069 / 10
१३	शारदातिलकम्	डॉ . चमनलाल गौतम	सं . सं , बरेली	1973 / 01
१४	श्रीपरात्रिंशिका	श्री मदभिनवगुप्तः	काश्मीर - श्रीनगर	1918 / 01
१५	श्रीमद्भगवद्गीता		गीताप्रेस , गोरखपुर	2069 / 11
१६	श्रीशक्तिसंगमतन्त्रम्	पं . व्रजवल्लभट्टि .	O . I . B	1978 / 01
१७	सर्वदर्शनसंग्रहः	प्रो . उमाशंकर शर्मा	चौ . वि . वाराणासी	2010 / 01
१८	सर्वलक्षण संग्रहः	स्वामी गौरीशङ्करभिक्षु	चौ . सं .सी . औ . वाराणासी	2010 / 01
१९	स्वच्छन्दतन्त्रम्	पं . व्रजवल्लभट्टि .	O . I . B	2004 / 02
२०	साहित्यदर्पणः	आचार्यविश्वनाथः	भा . वि . संस्थानम्	2014 / 02
२१	संस्कृत हिन्दिकोषः	वामनशि. आप्टे	कमलप्रकाशन , दिल्ली	2007
२२	संस्कृतसाहित्य का इतिहास	बलदेव उपाध्याय	शारदा प्रकाशन , वाराणासी	1978 / 01

२३	संस्कृतसाहित्य का इतिहास	राधावल्लभ त्रिपाठी	विश्वविद्यालय प्र . वाराणसी	2001 / 01
२४	पुराण विमर्श	बलदेव उपाध्याय	चौ . विद्याभवन , वाराणासी	2021
२५	दुर्गासप्तशती		गीताप्रेस , गोरखपुर	सं . 2075